http://www.rtuonline.com

# सस्कृत

## द्वितीय प्रश्न पत्रम् : (वैदिकसाहित्य, गद्यसाहित्यम्, अनुवादः व्याकरणम् च)

Time allowed : Three hours | Maximum marks : 100

1. निम्नलिखित मंत्रयोः हिन्दीभाषायां अनुवादः करणीयः- 2×5=10

(क) अग्निना रयिमश्नवत् पोषमेव दिवे दिवे।
यशसं वीरवत्तमम्।।

अथवा

परा मे यन्ति धीतयो गावो न गव्यूतीरनु ।
इच्छन्तीरुरू चक्षसम् ।।

(ख) एक एवाग्निर्बहुधा समद्धिः, एकः सूर्यो विश्वमनु प्रभूतः ।
एकैवोषाः सर्वमिदम् विभात्यैकं वा इदं विबभूव सर्वम् ।।

अथवा

यः पृथिवीं व्यथमानामदृहंद्यः पर्वतान्प्रकुपितां अरम्णात् ।
यो अंतरिक्षं विममे वरीयो यो द्यामस्तभ्नात्स जनास इन्द्रः ।।

2. अधोलिखितेषु केषाञ्चित पञ्चप्रश्नानां संस्कृतःभाषायामुत्तराणि देयानि- 5×2=10

(क) इन्द्रसूक्तस्य ऋषि-छन्दसोः उल्लेख करणीयः।

(ख) 'यः प्राणतो निमिषतोमहित्वैक' इति मंत्रः कुतः?

(ग) अग्निदेव कस्य लोकस्य देवता?

(घ) संज्ञान सूक्तस्य एको मंत्रो विलेख्यः।

(ङ) विष्णु सूक्तस्य ऋषि-छन्दसोः उल्लेख करणीयः।

(च) इन्द्रस्य प्रमुखआयुधं किम्?

(छ) 'कः' कस्य पर्यायवाची अस्ति?

3. अधोलिखितयोः मंत्रयोः कस्यचिदेकस्य मंत्रस्य व्याख्यां विधेया।

(क) असुर्या नाम ते लोका अंधेन तमसावृताः।
तोस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः।।

(ख) अन्धं तमः प्रविशन्ति येऽविद्यामुपासते।
ततो भूय इव ते तमो ये उ विद्यायां रताः।।

4. अधेलिखितयोः गद्यांशयोः भाषायाम् अनुवादः करणीय-

(क) यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालन निर्मलापिकालुष्यमुपयाति बुद्धिः। अनुज्झित-धवलताति सरागैव भवति यूनां दृष्टिः। अपहरतिच वात्येव शुष्क पत्रं समुद् भूतरजोभ्राँति रतिदूरमतमेच्छत्रा यौवन-समये पुरुषं प्रकृतिः।

अथवा

अयमेव चानास्वादिताविषयरसस्य ते काल उपदेशस्य। कुसुम-शर-प्रहार जर्जरिते हि हृदये जलमिव गलत्युपदिष्टम्। अकारणं च भवति दुष्प्रकृतेरन्वयः श्रुतं वा विनयस्य। चन्दनप्रभवो न दहति किमनलः? किं वा प्रशमहेतुनापि न प्रचंड तरीभवति वडवानलो वारिणां?

http://www.rtuonline.com

http://www.rtuonline.com

(ख) आलोकयतु तावत् कल्याणभिनिवेशी लक्ष्मीमेव प्रथमम, इयं हि सुभट खड्गमंडलोत्पलवनविभ्रम भ्रमरीलक्ष्मी। क्षीरसागरात् परिजातपल्लवेभ्यो रागम् इन्दुशकलादेकांत वक्रताम्, उच्चैः श्रवस रचञ्चलताम्, कालकूटान्नमोहनशक्त्रिम, मदिराया मदम् कौस्तुभ मणेरति नैष्ठुर्यम्।

**अथवा**

तथाहि-अभिषेक समयैवैषां मंगलकलशजलैरिव प्रक्षाल्यूते। दाक्षिण्यम्, अग्निकार्यधूमेनेव मलिनीक्रियते हृदयम्। पुरोहित कुशाग्र-सम्मार्जनीभिरिवापह्रियते क्षांतिः उष्णीषपट्ट बन्धेनेवाच्छाद्यते जगगमनस्मरणम्। आतपत्रमंडलेनेवापसार्यते परलोकदर्शनम्, चामर पवनैरिवापह्रियते सत्यवादिता।

5. अधोलिखितेषु केषाञ्चित प्रञ्चप्रश्नानां संस्कृतभाषायाममुत्तराणि देयानि-

(क) शुकनासोपदेशः कस्य ग्रंथस्य अंशः अस्ति?

(ख) लक्ष्मीमदः कीदृशं भवति?

(ग) चंद्रापीडः कः आसीत्?

(घ) हृदये किम इव गलति उपदिष्टम्।

(ङ) अपानभूमिर्विषय मधूनाम् का?

(च) मंगलकलशजलैरिव कां प्रक्षाल्यते?

(छ) शुकनासः कस्य अमात्य आसीत्?

6. अधोलिखितानां वाक्यानां हिन्दी भाषायाम् अनुवादः करणीयः।

(क) सत्सङ्गतिः कथय किं न करोति पुंसाम्।

(ख) छायेव मैत्री खलसज्जनानाम्।

(ग) आचारः परमो धर्मः।

(घ) सत्यान्नास्ति परो धर्मः।

(ङ) किमिव हि मधुराणां मण्डनं नाकृतिनाम्।

(च) विद्या विहीना पशुभिः समाना।

(छ) भवितव्यानां द्वाराणि भवन्ति सर्वत्र।

(ज) उद्योगिनं पुरूषसिंहमुपैति लक्ष्मीः।

(झ) योगः कर्मसु कौशलम्।

(ञ) स्वदेशे पूज्यते राजा विद्वान सर्वत्र पूज्यते।

7. अधेलिखितेषुसूत्रेषु केषाञ्चित त्रयाणां. सूत्राणां व्याख्या करणीया।

(क) कृत्तद्धितसमासाश्च। (ख) बहुवचने झल्येत्।

(ग) जश्शसोः शिः। (घ) आदेश प्रत्यययोः।

(ङ) ङे. प्रथमयोरम्

8. अधोलिखितयदेषु त्रयाणां पदानां सूत्रोल्लेखपूर्वकं सिद्धि कुरुत-

(क) रामैः। (ख) ज्ञाने।

(ग) सर्वस्मिन्। (घ) विदुषः।

(ङ) जगतः। (च) मतीनाम्।

9. अधोलिखितेषु केषाञ्चित् चतुर्ण्णां सूत्राणां सोदाहरणं व्याख्या कार्या।

(क) अधिशीङ् स्थासां कर्म। (ख) येनाङ्ग विकारः।

(ग) रूच्यर्थानां प्रीयमाणः। (घ) भुवः प्रभवश्च।

(ङ) यतश्च निर्धारणम्। (च) षष्ठी शेषे।

http://www.rtuonline.com